दिनाङ्कः:- 26.05.2025

प्रात: - 06:55

**प्रधानमन्त्री–गुजरात–यात्रा**

**प्रधानमन्त्री नरेन्द्र मोदी अद्यारभ्य  गुजरातस्य द्वि-दिवसीय-यात्रायां भविष्यति। स्वस्य भ्रमण-काले प्रधानमन्त्री राष्ट्राय एकं इंजन-निर्माण-संयन्त्रं समर्पयिष्यति अपि च दाहोद-नगरे विद्युद्-इञ्जन-कृते हरित-ध्वजम् अपि प्रदर्शयिष्यति। सः दाहोद-नगरे प्रायः चतुर्विंशति-सहस्र-कोटि-रूप्यकाणां अनेकासां विकास-परियोजनानां आधार-शिला-स्थापनं, उद्घाटनं च करिष्यति । श्रीमोदी वेरावल-अहमदाबादयोः मध्ये वंदेभारत-एक्सप्रेस्, वलसाद्-दहोद-स्थानकयोः मध्ये एक्स्प्रेस्-रेलयानं च सञ्चालयितुं हरितध्वजं प्रदर्शयिष्यति। सः गेज परिवर्तितस्य कटोसन- कलोल् खण्डस्य उद्घाटनं करिष्यति। तत्पश्चात् प्रधानमन्त्री भुजनगरं सम्प्राप्य चतुःशतोत्तर-त्रिपञ्चाशत् कोटितोप्यधिक-रूप्यकाणां बहु-विकास-परियोजनानां आधार-शिला-स्थापनं उद्घाटनं च करिष्यति। द्वितीय-दिने प्रधानमन्त्री गुजरात-नगर-विकास-कथायाः विंशति वर्षपूर्ति-उत्सवे भागं गृह्णीयात् तथा गान्धीनगरे नगर-विकास-वर्षस्य पञ्च-विंशत्यधिक द्वि-सहस्रतम वर्षस्य प्रारम्भं करिष्यति। प्रधानमन्त्रिणा गान्धीनगरे नगरविकासवर्ष पञ्चविंशत्यधिक द्विसहस्र, गुजरातस्य नगरविकासयोजनायाः, राज्यस्वच्छवायुकार्यक्रमस्य आरम्भः च क्रियते।**

**अमित शाह:**

**गृहमंत्री अमित शाह: अद्य प्रात: नागपुरस्य जामठायां राष्ट्रीय-कैंसर संस्थाने ‘स्वस्ति निवासस्य आधारशिलां स्थापयिष्यति। असौ मध्याह्ने कामठी क्षेत्रस्य चिचेली इत्यत्र राष्ट्रीय फोरेंसिक विज्ञान विश्वविद्यालयस्य नागपुर परिसरस्य आधारशिलां च**

स्थापयिष्यति। श्री शाहः अद्यारभ्य महाराष्ट्रस्य त्रिदिवसीयायां यात्रायां भविष्यति। असौ तत्र हि विभिन्नेषु कार्यक्रमेषु सम्मिलितो भविष्यति।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी ह्यः उक्तवान् यत् सिन्दूराभियानेन सम्पूर्णे विश्वे आतङ्कवादं विरुध्य युद्धाय नूतनः विश्वासोत्साहः समागतः। आकाशवाण्याः स्वस्य "मन की बात" कार्यक्रमे राष्ट्रं सम्बोधयन् श्रीमोदी सिन्दूराभियानावधौ सशस्त्रसेनाभिः प्रदर्शितस्य शौर्यस्य प्रशंसाम् अकरोत्। असौ सीम्नः पार-स्थितानां आतङ्कवादीनां निगूढ-स्थानानि सशस्त्रसैन्यबलेन यथा लक्ष्य-वेधन-पूर्वकं च विनष्टीकृतानि, तस्य पराक्रमस्य प्रशंसाम् अकरोत्। सः अवदत् यत् अद्य समग्रः देशः आतङ्कवादस्य विरुद्धं एकीभूतः अस्ति, तस्य समाप्त्यर्थं च संकल्पेन परिपूर्णः अस्ति।

प्रधानमन्त्रिणा उक्तं यत् सिन्दूराख्यं सैन्याभियानं केवलं सैन्याभियानं नासीत्, अपितु राष्ट्रस्य संकल्पस्य शौर्यस्य च प्रतिबिम्बम् अस्ति।

## उपराष्ट्रपतिः जगदीप धनखड़

उपराष्ट्रपतिः जगदीप धनखड़ः अद्य एकदिवसीयायां यात्रायां मध्यप्रदेशं समायाति। असौ नरसिंहपुरे त्रिदिवसीय कृषि उद्योग समागमस्य उद्घाटनं विधास्यति। समागमोऽयं मईमासस्य अष्टाविंशतिः दिनाङ्कं यावत् प्रचलिष्यति। यस्योद्देश्यं वर्तते राज्यस्य कृषि-आधारित-अर्थव्यवस्थायाः प्रसंस्करणं अपि च वृत्त्यवसराणां सृजनं च।

## आई.पी.एल.

आई.पी.एल. -टी-20, क्रिकेट-स्पर्धा-मालिकायां सनराईजर्स हैदराबाद दलेन कोलकाता नाईट राइडर्स दलं दशाधिक-एकशतं अंकेन पराजितम्।

क्रिकेट क्रीडा इयं दिल्ल्या: अरूण जेटली क्रिडाङ्गणे समभवत्।

एतदतिरिच्य सम्प्रति पंजाब किंग्स दलं मुम्बई इन्डियन्स दलं जयपुरस्य सवाईमानसिंह क्रीडांगणे सम्मुखी-करिष्यति।